# Shri Vajrapa njarakakhyam Shri Kalika Kavacham

# શ્રીવજ્રપઞ્જરકાખ્યં શ્રીકાલિકાકવચમ્

## Document Information

Text title : Kalika Kavacham Vajrapanjarakakhyam

File name : vajrapanjarAkhyakAlIkavacham.itx

Category : devii, kavacha, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : NA

Proofread by : NA, PSA Easwaran

Latest update : June 5, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2022

*sanskritdocuments.org*

Shri Vajrapa njarakakhyam Shri Kalika Kavacham

# શ્રીવજ્રપઞ્જરકાખ્યં શ્રીકાલિકાકવચમ્

ૐ શ્રીગણેશાય નમઃ ।
શ્રીદેવ્યુવાચ -
અધુના દેવદેવેશ કવચં વજ્રપઞ્જરમ્ ।
કાલ્યાઃ કૃપાકટાક્ષોર્મિ કિમીરિતદૃશોદ્ભવમ્ ॥ ૧॥

શ્રીઈશ્વર ઉવાચ -
શ ૃણુ દેવિ પ્રવક્ષ્યામિ તવાગ્રે કવચોત્તમમ્ ।
યસ્મિન્કૃતે ભવતિ શ્રીકાલીતનયો નરઃ ॥ ૨॥

વિનામુના ન સિદ્ધઃ સ્યાદ્દક્ષિણા દક્ષિણાનના ।
અતઃ કવચિના ભાવ્યં સાધકેન્દ્રેણ સિદ્ધયે ॥ ૩॥

ઋષિરસ્ય સ્મૃતઃ શમ્ભુચ્છન્દઃ પ્રાકૃતિરુત્તમમ્ ।
દેવતા દક્ષિણાં ધ્યાત્વા કલીં પ્રત્યક્ષરં ન્યસેત્ ॥ ૪॥

અમ્ભોદશ્યામલાઙ્ગીમતિવિકટદતીં લોલજિહ્વાં જટાલાં
મુણ્ડં વામે દધાનાં કરકમલતલે દક્ષિણે ચન્દ્રહાસમ્ ।
સૃક્કિ દ્વન્દ્વસુધાધરમુખકમલાં પ્રેતદો વલ્લિકાઞ્ચીં
માર્દ્વીકોન્મત્તનેત્રાં શવસ્પદયગતાં નૌમિ કાલીં સકાલામ્ ॥ ૫॥ (શિવહૃદયગતાં ?)

ક્રીં બીજં મૂર્ધ્નિ ગણ્ડદ્વિતયમનુ પુનસ્તદ્દ્વયં હૂં દ્વયં યઃ
નેત્રદ્વન્દ્વે ચ લજ્જાયુગલમપિ પુનઃ કર્ણયોર્વિન્યસેચ્ચ ।
નાસાદ્વન્દ્વે ચ રક્ષેદ્રદનરસનયોઃ કાલિકાદન્તપઙ્ક્તૌ
લિઙ્ગે ભૂસ્યદ્વુદે ચ ત્રિતયમપિ પુનર્બીજમાદ્યં ન્યસેચ્ચ ॥ ૬॥

બાહુદ્વન્દ્વે ચ હ્રૂં હ્રૂં ચરણયુગલકે શક્તિબીજદ્વયં ચ
સ્વાહા સર્વત્ર દેહે વિષદતરમતિર્વિન્યસેદ્વ્યાપકે ચ ।
એવં ન્યાસં વિધાય ત્રિભુવનવલયાખ્યાતકીર્તિઃ કવીન્દ્રો
વજ્રાઙ્ગો જીવલોકે જયતિ વહુધનઃ સાધકઃ સિદ્ધમન્ત્રઃ ॥ ૭॥

ક્રીં ક્રીં ક્રીં દેવિ હૂં હૂં (હ્રૂં હ્રૂં ?) કહ કહ કહ હે દેવી હ્રૂં હ્રૂં હ હાં હા
દં દં દં દક્ષિણે ત્વાં ક ક ક ક કલિતે કાલિકે કાલપત્નિ ।
ક્રીં ક્રીં ક્રીં યોનિ હ્રૂં હ્રૂં હ હ હ સહિતે કાલિ હ્રીં હ્રીં હરેશે
સ્વાહે સ્વાહેશનેત્રે ભ ભ ભ ભ ભવતી ભૂતયો વો ભવન્તુ ॥ ૮॥

ભૂતપ્રેતપિશાચપન્નગપરપ્રત્યર્થિસેનાભયે
રણ્યે રણ્યતરક્ષુ ભીષુ ચ તથા ચાન્યાસુ ભીષુ સ્ફુટમ્ ।
સ્મૃત્વૈવં મનુમુત્તમં ગતભયો જાયેત વીરોત્તમો
વીરં ચાપિ ચ સાધયેદનુ મનું સ્વાન્તે દધત્સાધકઃ ॥ ૯॥

ઇતિ શ્રીવજ્રપઞ્જરકાખ્યં શ્રીકાલિકાકવચં સમ્પૂર્ણમ્ ।

---

*Shri Vajrapa njarakakhyam Shri Kalika Kavacham*
pdf was typeset on June 5, 2022

Please send corrections to *sanskrit@cheerful.com*